देवी पूजापद्धतिः

पं॰ गोविंदजी गणेशजी नागरनी पोथी
पंचदशी पद्धति पत्रामलि चतुर्थाह्नि
शर्मा ॥ श्रीमंदूय पत्र ३१२

॥श्रीगुरुगणपतीष्टदेवताभ्यो नमः॥ अथ पद्धतिः॥

साधकवर्यो ब्राह्मे मुहूर्ते चोत्थाय [illegible] शौचादिकं विधाय मुखप्रक्षालनं कृत्वा भस्मोद्धारणं कृत्वा रात्रिवासं त्यक्त्वा धौतवाससी परिधाय आचम्य स्वासने उपविश्य श्रीगुरुचिंतनं कुर्यात्॥ तत्स्वरूपं च॥ ब्रह्मरंध्रस्थश्वेतसहस्रदलकमलकर्णिकायां सिंहासने समुपविष्टं वामांके तया देव्या रक्तवस्त्राभरणमाल्यानुलेपभूषितया वामकरे धृतरक्तपद्मया [illegible]

भस्मनं त्रास्त्र॥ [illegible] मनितं त्य॥ ईशा० नी०॥ शिरसि॥ त पुरुषा० मुखे॥ अघोरा० हृदये॥ वामदे० गुह्ये॥ सद्योजा० पाद०॥ प्रणवे

१

त्वल्लीलाकमल्वया दक्षिणाभुजोनालिंगितं श्वेतवस्त्रा
भरणमाल्यानुलेपभूषितं मुक्तादामादिभूषितं चंद्र
कांतनिभं त्रिनेत्रं ज्ञानमुद्रापुस्तकवराभयकरं सां
तं सुप्रसन्नं शिवस्वरूपिणं श्रीगुरुं ध्यात्वा तच्चरणा
रविंदयुगलविगलितअमृतधाराभिः स्वदेहं
परिप्लुतं विभाव्य॥ श्वेतं श्वेतविलेपमाल्यवसनं
वामेन रक्तोत्पलं बिभ्रत्या प्रियया येतरेणातरसाश्लि
ष्टं प्रसन्नाननं॥ हस्ताभ्यामभयं वरं च दधतं शंभु

स्वरूपं परं हाल्लाल्लोहितल्लोचनोत्पल्लयुगं ध्याये

च्छिरस्थं गुरुं ॥१॥ श्रीनाथादिगुरुत्रयं गणपतिं पी

ठत्रयं भैरवं सिद्धौघो वटुकत्रयं पदयुगं दूतिक्रमं शां

भवं ॥ वीरेचाष्टचतुष्कषष्ठिनवकं वीरावली पंचकं

श्रीमन्मालिनिमंत्रराजसहितं वंदे गुरोर्मंडलं ॥२॥

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं द्वंद्वातीतं

गगनसदृशं [illegible] ॥ तत्वमस्यादिल

क्ष्यं ॥ येकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं

२

भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि ॥३॥ आनंद
मानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपं ॥ यो
गीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥४॥
इति श्लोकचतुष्टयं पठित्वा अमुकस्वामिने प्रणौमि ॥
इत्येकैकामानं सोपचारैः संपूज्य तन्नाममूर्वकं यथाश
क्तिमूलमंत्रं जपित्वा ॥ ततो हृत्पद्मे निजेष्टदेवतां ध्या
त्वा ॥ दोर्भिर्युक्तां चतुर्भिः स्फटिकमणिमयीमक्षमालां
दधानां हस्ते नैकेन पद्मं सितमपि च शुकं पुस्तकं चा
परेण ॥ यासा कुंदेंदुरांखस्फटिकमणिनिभा भा
समाना समाना सामे वाग्देवतेयं निवसतु वदने सर्वदा

त्रय

सुप्रसन्ना ॥१॥ चतुर्भुजे चंद्रकलावतंसे कुचोन्नते कुंकु
मरागशोणे ॥ पुंड्रेक्षुपाशांकुशपुष्पबाण हस्ते नम
स्ते जगदेकमातः ॥२॥ जपाकुसुमभासुरां त्रिनयनां
त्रिकोणांतरनिवासिनीं त्रिपुरसुंदरीं सेंदुकां ॥
करांबुज चलुष्टयां मधुरचापपाशांकुशां प्रसन्न नु
शीरशोभिनीं ललितवेषभूषां भजे ॥३॥ मुक्ताकुंदें
दुगौरां मणिमयमुकुटां रत्नताटंकयुक्तामक्षस्त्रक्पु
स्तहस्तामभयवरकरां चंद्रचूडां त्रिनेत्रां ॥ नाना
लंकारयुक्तां सुरमकुटमणिद्योतितः स्वर्णपीठां सा

प्रातः प्रभात विसायां तंसायादि प्रातरं तथा ॥ पल्कतोमि जगन्नाथ नद स्कान्व दुजनं ॥

नंदां सुप्रसन्नां त्रिभुवनजननी चेतसा चिंतयामि ॥४॥

उषसि मागध मंगल गायनै झटिति जागृहि जागृहि जागृहि ॥ अति कृपार्द्र कटाक्ष निरीक्षणै र्जगदिदं जगदंब सुखी कुरु ॥५॥ इति श्लोक पंचकं पठित्वा भूमि प्रार्थनां कुर्यात् ॥ समुद्र मेखले देवी पर्वत स्तन मंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ अनेन श्लोकेन पृथिवी उपरि पादं निधाय प्रातः स्मरणं कुर्यात् ॥ तदनंतरं नद्यादौ गत्वा देशकालौ संकीर्त्य वैदिक स्नानं कृत्वा तांत्रिकमाचरेत् ॥

स्वमंत्रस्य ऋष्यादिन्यासपूर्वकमिष्टदेवतां ध्यात्वा ॥
अंकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य ॥ वं इति धे
नुमुद्रया अमृतीकृत्य ॥ हुं इति संरक्ष्य तज्जले देव
तामूर्तिं ध्यात्वा तच्चरणस्फुरत्तीर्थे त्रिर्निमज्ज्य अं
तर्जले त्रिर्मूलेन अघमर्षणं कृत्वा नाभिदघ्ने ज ४
४ ले अंजलिना तोयं गृहीत्वा त्रिवारं मूलेनाभिमं
५ त्र्य त्रिवारं मूलेन स्वमूर्ध्नि निक्षिपेत् ॥ मूलेन
त्रिराचम्य मूलेन त्रिः संतर्प्य ॥ ततो बहिर्निस्
त्य वस्त्रादिना स्वांगरोपणं कृत्वा मूलेनाभ्युक्षिते

वस्त्रे परिधाय भस्मोद्धारं यां कुर्यात् ॥ वैदिक संध्यां कृत्वा तांत्रिकी माचरेत् ॥ तत्रैवेष्यं ॥ ॐ ऐं ह्रीं श्रीं क५ आत्मतत्त्वाय स्वाहा ॥ ॐ ऐं ह्रीं श्रीं ह६ विद्यातत्त्वाय स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स४ शिवतत्त्वाय स्वाहा ॥ ॐ ऐं ह्रीं श्रीं क१५ सर्वतत्त्वाय स्वाहा ॥ इत्याचम्य ॥ श्रीं मुखे ॥ ऐं नमः दक्षिण नासायां ॥ सौं नमः वाम नी सायां ॥ क्लीं नम दक्षनेत्रे ॥ ह्रीं नमः वामनेत्रे ॥ श्रीं नमः दक्षकर्णे ॥ ह्रीं नमः वामकर्णे ॥ क्लीं नमः नाभौ ॥ ऐं नमः दक्षबाहुमूले ॥ क्लीं नमः वामबाहुमूले ॥

तं पा मध्ये जलं गृहीत्वा मूलेन त्रिवारमभिमंत्र्य तेन जलेन स्वदेहं त्रिः प्रोक्ष्य ॥ ऐं मूलमंत्रेण सकलीकृत्य ॥ आचम्य ॥ ५

इति विन्यस्य मूलेन प्राणायामत्रयं कृत्वा ॥ तांत्रिकसंध्यामुपासिष्ये ॥ वाम हस्ते जलं गृहीत्वा मूलेन एकवारमभिमंत्र्य ॥ तेन जलेन स्वदेहं मूलेन त्रिः प्रोक्ष्य ॥ सव्य हस्ते जलं गृहीत्वा मूलेनाभिमंत्र्य प्रोक्ष्य ॥ आचामेत् ॥ सूर्यार्घ्यं दत्वा ॥ मूलमुच्चार्य सवित्रे नमः इदमर्घ्यं समर्पयामि ॥ इति अर्घ्यत्रयं दत्वा आचम्य ॥ यथाशक्ति गायत्रीं जपेत् ॥ तद्यथा ॥ ॐ ऐं ह्रीं श्रीं क ए ई ल ह्रीं वागीश्वरी विद्महे ॐ ऐं ह्रीं श्रीं ह स क ह ल ह्रीं कामेश्वरी धीमहि ॥

५

५

5

ॐ ऐं ह्रीं श्रीं सहलन्नः शक्तिः प्रचोदयात् ॥ एतां
गायत्रीं यथाशक्ति जपित्वा ॥ मूलेन त्रिः प्रा
णानायम्य ऋष्यादिषडंग ध्यानमानसपूजां
ते सूर्यमंडलस्थां देवीं ध्यात्वा मूलविद्यया अ
ष्टाविंशतिवारेणाभिमंत्र्य धेनुमुद्रया अमृ
तीकृत्य तेन जलेन परमात्मूल बुध्या अष्टाविं
शतिवारेण केवलं मूलदेवीं तर्पयेत् ॥ सकल
विद्यामुख्याचार्य श्रीत्रिपुरसुंदरीं तर्पयामि ॥
इति तर्पयां कृत्वा पुनः प्राणायाम ऋष्यादिषडंग

ध्यानमानसपूजां कृत्वा अनेन प्रातः संध्या
तर्पणेन श्रीत्रिपुरसुंदरी प्रीयतां ॥ नाथस्तो
त्रं पठेत् ॥ नमस्ते नाथ भगवान् शिवाय गु
रुरूपिणे ॥ विद्यावतारसंसिद्ध्यै स्वीकृतान
केविग्रहा ॥ नवाय नवरूपाय परमार्थैकरू
पिणे ॥ सर्वाज्ञानतमोभेदभानवे चिद्घना
यते ॥ स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्म
ने ॥ परतंत्राय भक्तानां भव्यानां भव्यरूपि
णे ॥ विवेकिनां विवेकाय विमर्शाय विमर्शिने ॥

प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ पुरस्ता
त्पार्श्वयोः पृष्ठे नमस्कुर्यां उपर्यधः ॥ सदा मच्चि
त्तभावेन विधेहि भव दासनं ॥ त्वत्प्रसादादहं दे
व कृतकृत्योस्मि सर्वदा ॥ मायामृत्युमहापाशा
न्विमुक्तोस्मि शिवोस्मि च ॥ ॐ इति नाथस्तोत्रं ॥
अथ पादुकास्तोत्रं ॥ श्रीगुरामृतवलयं स्वनाथोः
कवलीकृताः ॥ एवं कुलार्णवं ज्ञानं पादुकायां प्र
तिष्ठितं ॥२॥ कोटिकोटिमहादानात्कोटिकोटिम
हाव्रतात् ॥ कोटिकोटिमहायज्ञात्परा श्रीपादुकास्मृतिः

कोटिमंत्रजपात्कोटि पुण्यतीर्थावगाहनात्॥ कोटि
कोटिदेवतार्चापरा श्रीपादुकास्मृतिः॥३॥ महारो
गे महोत्पाते महादुःखे महाभये॥ महापदि महा
पापे स्मरतारक्षतिपादुका॥४॥ दुराचारे दुरात्मा
पे दुःसंगे दुष्प्रतिग्रहे॥ दुराहारे च दुर्बुद्धौ स्मरतार
क्षतिपादुका॥५॥ तेनाधीतं श्रुतं ज्ञानं इष्टं दत्तं
च पूरितं॥ जिह्वाग्रे वर्त्तते यस्य सदा श्रीपादुकापि
ये॥६॥ सकृत् श्रीपादुकां देवी यो वा जपति भक्तितः॥
स सर्वपापरहित प्राप्नोति परमां गतिं॥७॥ शुचि

वाप्यसुचिर्वा यो भक्त्या स्मरति पादुकां ।। अनायासेन
धर्मार्थकाममोक्षांल्लभेत सः ।। ८ ।। श्रीनाथचरणां
भोजं यस्यां दिशि विराजते ।। तस्यै दिशे नमस्कुर्या
द्भक्त्या प्रतिदिनं प्रिये ।। ९ ।। न पादुकापरो मंत्रो न दे
वः श्रीगुरोः परः ।। नहि शाक्तात्परो मार्गो न पुण्यं
कुलपूजनात् ।। १० ।। ध्यानमूलं गुरोर्मूर्तिः पूजा
मूलं गुरोः पदं ।। मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गु
रोः कृपा ।। ११ ।। गुरुमूलाः क्रियाः सर्वा लोकेस्मि
न्कुलनायिके ।। तस्मात्सेव्यो गुरुं नित्यं सिध्यर्थं भ

क्तिसंयुतैः ॥१२॥ तावद्दालिभयं दुःखं मोहस्त्याशुक्त
मापदः ॥ यावन्नायाति शरणं श्रीगुरुं भक्तिवत्सलं ॥१३॥
तावद्भवति संसारे सर्वदुःखमलीनता ॥ न भवंति
गुरुभक्ता ये देवी शिव देहिनः ॥१४॥ इति पादुका
स्तोत्रं ॥ इति प्रातःकृत्यं ॥ ततो यागमंडपसमीपे गत्वा
पादौ प्रक्षाल्य ॥ हस्ते अक्षतानादाय ॥ धात्रे नमः द
क्षिणपार्श्वे ॥ विधात्रे नमः वामपार्श्वे ॥ गंगायै नमः दक्ष
पादे ॥ यमुनायै नमः वामपादे ॥ द्वारश्रियै नमः ऊर्ध्वं ॥
देहल्यै नमः अधः ॥ वास्तुपुरुषाय नमः इति मध्ये ॥
ततो वामशाखां संकोच्य मंडपं प्रविश्य ॥ ॐ भूर्भुवः

स्वः इति भूमिं प्रोक्ष्य आसनं न्यस्य ॥ ॐ पुंडरीकाक्षा
य नमः इति तस्मिन् प्राङ्मुख उदङ्मुखो वा उपवि
श्य ॥ ॐ ह्रीं आधारशक्ति कमलासनाय
नमः इत्यासनं संपूज्य ॥ पृथ्वीत्यस्य मेरुपृष्ठ ऋ
षिः कूर्मो देवता सुतलं छंदः ॥ आसनोपवेशने वि
नियोगः ॥ पृथ्वी त्वया धृता लोका देवि त्वं विष्णु
ना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं ॥
अपसर्पंतु ये भूता ये भूता भुवि संस्थिता ॥ ये भूता
विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ अपक्रामंतु भू

प्रबोधानंदनाथश्रीगुरुपादुकां०। जगन्नाथानंदनाथश्रीपरमगुरु०
अनंतानंदनाथश्रीपरमेष्ठीगुरु०। देवानंदनाथश्रीपरात्पर गुरु०॥
तो निपिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्म
कर्म समारभे॥ स्वशिरसि संपुटमुद्रया गुरुवंद
नं कुर्यात्॥ श्रीगुरुभ्यो नमः परमगुरुभ्यो नमः॥ प
रमेष्ठीगुरुभ्यो नमः॥ परात्परगुरुभ्यो नमः॥ वाम
पादेन घातत्रयं तालत्रयं दिव्यदृष्टि अवलोकनादि
कं बंधनं सप्ताग्निप्राकारान् कृत्वा यं रः अस्त्राय फ
ट् इति मंत्रेण। गं गुरुभ्यो नमः वामांसे॥ गं गण
पतये नमः दक्षिणांसे। दुं दुर्गायै नमः वामोरौ॥ क्षं
क्षेत्रपालाय नमः दक्षिणोरौ॥ सं सरस्वत्यै नमः मुखे

पँ परमात्मने नमः हृदि ॥ प्रणवेन प्राणा नायम्य अस्त्रे
णापरस्परं करौ स्पृष्ट्वा दग्धौ विभाव्य प्रणवेन पुनरु
त्पन्नौ विभाव्य ॥ अं आं इं ईं उं ऊं इति षट्स्वरैर्नमोन्
तैः करतल पृष्ठयोर्न्यसेत् स्वाहा । ऋं ॠं लृं लॄं
एं ऐं ओं औं अं अः इति नमोन्तैर्दशस्वरैः दक्षिणां
गुष्ठमारभ्य वामांगुष्ठपर्यन्तं सर्वांगुलीषु स्वाहा ।
ककारादि सकारान्तैः सबिन्दुकैर्नमोन्तैर्दक्षपाल
र्जनीमारभ्य वाम तर्जनी पर्यन्तं अंगुलीषु पर्वत्रयेषु
च विन्यस्य ॥ हं लं क्षं इति त्रिभिर्नमोन्तैः अंगुष्ठयोर्यु

गपलूपर्वद्वयेग्रेचविन्यस्य॥ इतिकरशुद्धिं विधायभू
तशुद्धिं कुर्यात्॥ हंसः इति हृत्स्थं जीवात्मानं द्वादशां
तस्थं परमात्मना संयोज्य॥ हहहेति मूलाधारस्थां
कुंडलिनीं सुषुम्नामार्गेण परमात्मनि संयोज्य॥ पा
दादिजानुपर्यंतं व्याप्यस्थिता पृथिवी चतुरस्रां वज्र
लांछितां पीतवर्णा ब्रह्मदेवत्यां सनिवृत्तिकलां लं
बीजयुक्तां सेंद्रियां सगुणां गंधतन्मात्रे प्रविलाप
यामि॥ जान्वादिनाभिपर्यंतं व्याप्यस्थिता अपोर्द्धचं
द्राकाराः कोटिद्वये पिपद्मलांछिताः शुक्लवर्णा वि

क्षुद्रैवत्याः सप्रतिष्ठाकलावंबीजयुक्ताः सेंद्रियाः स
गुणा रसतन्मात्रे प्रविलापयामि॥ गंधं च तन्मात्रं च तत
त्रैव प्रविलापयामि॥ नाभ्यादिकंठपर्यंतं व्याप्य स्थि
तं तेजः त्रिकोणाकारं स्वास्तिकलांछितं रक्तवर्णं
रुद्रदैवत्यं सविद्याकलं रंबीजयुक्तं सेंद्रियं सगुणं
रूपतन्मात्रे प्रविलापयामि॥ रसतन्मात्रं च तत्रैव
प्रविलापयामि॥ कंठादिभ्रूमध्यपर्यंतं व्याप्य स्थितं
वायुं षट्कोणाकारं षट्बिंदुलांछितं धूम्रवर्णं ईश्वर
वर्णमीश्वरदैवत्यं शांतिकलाधिष्ठितं यंबीजयुक्तं

सेंद्रियं सगुणं स्पर्शतन्मात्रे प्रविलापयामि॥ रूपतन्मा

त्रं च तत्रैव प्रविलापयामि॥ ब्रह्मरंध्यादि ब्रह्मरंध्रांतं

व्याप्य स्थितमाकारं वर्तुलाकारं च्च अब्जांछितं धूम्र

वर्णं सदाशिवदेवत्यं शां{?}यलीलकलाधिष्ठितं हंबी

जयुक्तं सेंद्रियं सगुणं शब्दतन्मात्रे प्रविलापयामि।

११ स्पर्शतन्मात्रं च तत्रैव प्रविलापयामि। शब्दतन्मा ११

॥ त्रं मात्र नसि प्रविलापयामि॥ मनो अहंकारे प्रवि०॥

अहंकारं बुद्धौ प्रविला० बुद्धिं प्रकृतौ प्रवि०॥ प्रकृतिं

पुरुषे प्रविलापयामि॥ पुरुषं परमात्मनि प्रवि०॥ इति

श्वित्रापह॥ चैतन्यरहिते देहे अनादिभवसंचितं॥
ब्रह्महत्याशिरस्कं तं स्वर्णस्तेयभुजद्वयं॥ सुरापा
नहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संसर्गपदद्वंद्वमं
गप्रत्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रुवि
लोचनं॥ खड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिंतये
त्॥ इतिपापपुरुषं स्थूलं स्वक्ष्यं च शरीरं॥ यं १६
इति प्राणायामेन संशोष्य॥ रं ३२ इति प्राणायामेन
संदह्य भस्मीकृत्य भस्मराशिं रेचकेन यं बीजेनापोह्य
भस्मराश्यं तं रं सुद्धं देवोपासनायोग्यं शरीरोत्पादकं

संचिंत्य वं ६४ प्राणायामेन मूर्द्ध स्थित चंद्रमंडल निःसृत
तामृत तूष रेणालं भस्मराशिं संसिच्य ॥ लं १६ इति प्राणा
यामेन यथोचित नाशिकार्‌ंध्र स्वाहितं विभाव्य ॥ परमा
त्मनः सकाशात् पुरुषं कल्पयामि ॥ पुरुषात् प्रकृतिं
१२ कल्पयामि ॥ प्रकृतेर्बुद्धिं क० ॥ बुद्धेरहंकारं क० ॥ अहं
कारात् मनः कल्पयामि ॥ मनस आकाशं सेंद्रियं स १२
12 गुणं क० ॥ आकाशात् वायुं सेंद्रियं सगुणं ॥ वायोस्ते
जः सेंद्रियं सगुणं क० ॥ तेजसोपः सेंद्रियाः सगुणाः
कल्पयामि ॥ अद्भ्यः पृथिवीं सेंद्रियां सगुणां कल्पयामि ॥

इति यथास्थानं १९ तानि कल्पयित्वा ॥ सोहं इति परमात्म
नः सकाशात् जीवं हृदयकमलमानीय कुण्डलिनीय
थास्थानं संस्थाप्य प्राणप्रतिष्ठां कुर्यात् ॥ प्राणप्रतिष्ठा
मंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथ
र्वाणि छंदांसि सकलजगत्सृष्टिस्थितिसंहारका
रिणी प्राणशक्तिः परा देवता प्राणप्रतिष्ठार्थे वि
नियोगः ॥ प्रणवेन प्राणानायम्य ॥ अं कं खं गं घं ङं
आं आकाशवायुतेजःसलिलपृथिव्यात्मने अंगुष्ठा
भ्यां नमः ॥ इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगंधा

त्मने तर्जनीभ्यां नमः ॥ ॐ टं ठं डं ढं णं ॐ श्रोत्र त्वक् चक्षु
र्जिह्वाघ्राणात्मने मध्यमाभ्यां नमः ॥ ऐं तं थं दं धं नं ऐं
वाक्पाणिपायुपस्थात्मने अनामिकाभ्यां नमः ॥ ॐ
पं फं बं भं मं औं वचनादानगमनविसर्गानंदात्मने

१२

कनिष्ठिकाभ्यां नमः ॥ अं यं रं लं वं शं षं सं हं ळं क्षं अः

१३

मनोबुध्यहंकारचित्तात्मने करतलकरपृष्ठाभ्यां
नमः ॥ एवं हृदयादिषु विन्यस्य ॥ आं ह्रीं क्रों यं रं लं वं शं षं

13

सं हं [illegible] सः मम प्राणा इह प्राणाः ॥ आं १२ मम जी
व इह स्थितः ॥ आं १२ मम सर्वेंद्रियाणि [illegible] वाङ्मनश्च

क्षुश्रोत्रघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥
क्रौं ह्रीं आं हं सः सोहं स्वाहा हंसः सं लं इति त्रिर्व्याप्य
षडंगानि न्यस्य ऋषिछंदोदेवतान्यस्य॥ ओं नाभ्या
दिपादांतं॥ ह्रीं हृदयादिनाभ्यंतं॥ क्रौं शिर आदिहृद
यांतं॥ यं त्वगात्मने नमः॥ रं असृगात्मने० लं मांसा
त्मने० वं मेदात्मने० शं अस्थ्यात्मने० षं मज्जात्मने०
सं शुक्रात्मने० हं प्राणात्मने० सः जीवात्मने० इति य
थास्थानं न्यस्य॥ अथ ध्यानं॥ रक्ताब्धिपोतारुण
सरोजाधिरूढा कराब्जैः पाशं कोदंडमि

ष्ट्रङ्कगुणमथमप्यंकुशांपंचबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या देवीबालार्कवर्णाभवतु सुखकरी प्राणशक्तिः परा नः ॥ इति ध्यात्वामानसैरुपचारैराराध्य हृदये ऊर्ध्वांगुल्या हस्तं निधाय ओं १२ एकादशवारं मंत्रं जपित्वालयांगं कृत्वाध्यात्वा पंचयेत् ॥ इति प्राणप्रतिष्ठा ॥ अथ मातृकान्यासं कुर्यात् ॥ ब्रह्मा ऋषिः ॥ देवीगायत्री छंदः मातृकासरस्वती देवता मातृकान्यासे विनियोगः ॥ मातृकाभिः प्राणानायम्य ॥ ओं अं कं खं गं घं ङं आं अं गुष्ठाभ्यां०

२४ 14 २४

इं चं छं जं झं ञं ई तर्जनीभ्यां॰ ऊं टं ठं डं ढं णं ऊं मध्यमाभ्यां॰
ऐं तं थं दं धं नं ऐं अनामिकाभ्यां॰ ॐ पं फं बं भं मं औं क
निष्ठिकाभ्यां॰ अं यं रं लं वं शं षं सं हं ळं क्षं अः करत
लकरपृष्ठाभ्यां॰ मातृकान्यासं विन्यस्य॥ एवं हृदयादि
ब्रह्मा ऋषये नमः शिरसि॥ देवी गायत्री छंदसे नमः
मुखे॥ मातृका सरस्वती देवतायै नमः हृदये॥ ध्या
नं॥ पंचाशद्वर्णभेदै र्विहितवदनदोःपादयुक्कुक्षि
वक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुं
दावदातां॥ अक्षस्रक्कुंभचिंतालिखितवरकरां त्री

सर्णां पद्मसंस्था मघ्याकल्पामनुच्छस्तनजघनभरांभा
रलीलां नमामि॥ इति ध्यात्वा मानसैरुपचारैरुपचर्य॥
यो मे दौरस नार्णकर्णिकमच्चां दंद्वै स्फुरत्केसरं पत्रां
तर्गत पंच वर्णाय शल्लाणादि त्रिवृ० गं क्रमालू॥
१५ आशास्वस्त्रि षुल्लां तल्लां बगालियुं॥ जाक्षो णी पुरेणा १५
रतं वर्णाज्ञंकिरास्सि स्मरतं विषमदं प्र च्वं सिमदस्फंड
15 यं॥ तस्याप्यूर्षं घनीभूतं नवनीतनिभं भुवं॥ मूलाधारा
ख्चि रः पद्मं स्पर्शांतां विद्यदाकृतिः॥ तडित्कोटिप्रभा
दीप्ता बिसतंतुतनीयसी॥ प्रसुप्तभुजगाकारा सार्द्ध

त्रिवलये स्थिता॥ हह हेति॥ मूलाधारा ध्वनिं कृत्वा प्रबुद्धा शक्तिकुंडली॥ तयास्वच्छाधिरः पद्मादमृतौघस्वरूपिणः॥ निर्गता मातृका वर्णा सुषुम्नावर्त्मनालतुं॥ व्यापयित्वा स्थितान् सर्वानेवं ध्यात्वा प्रविन्यसेत्॥ कंठे षोडशदले॥ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति प्रागादिषोडशदले विन्यस्य॥ हृदये द्वादशदले॥ कं खं गं घं ङं चं छं जं झं ञं टं ठं इति विन्यस्य॥ लिंगे षट्दले क्रमले बं भं मं यं रं लं इति विन्यस्य॥ मूलाधारे चतुर्दले कमले वं शं षं सं इति विन्यस्य॥ भ्रूमध्ये द्विदले हं क्षं इति विन्यस्य नाभौ दशदले॥ डं ढं णं तं थं दं धं नं पं फं इति विन्यस्य॥ ३

इत्थं तु मातृकान्यासं कृत्वा बहिर्मातृकां न्यसेत्॥ अं नमः मू-
र्ध्नि॥ आं नमः मुखवृत्ते॥ इं दक्षनेत्रे॥ ईं वामनेत्रे॥ उं दक्षकर्णे॥
ऊं वामकर्णे॥ ऋं दक्षनासापुटे॥ ॠं वामनासापुटे॥ ऌं
दक्षगंडे॥ ॡं वामगंडे॥ एं ऊर्ध्वोष्ठे॥ ऐं अधरोष्ठे॥ ओं
ऊर्ध्वदंतपंक्तौ॥ औं अधोदंतपंक्तौ॥ अं तालुनि॥ अः नमः
जिह्वाग्रे॥ कं नमः दक्षबाहुमूले॥ खं नमः कूर्परे॥ गं मणिबंधे॥
घं अंगुलिमूले॥ ङं अंगुल्यग्रे॥ चं वामबाहुमूले॥
छं कूर्परे॥ जं मणिबंधे॥ झं अं[illegible]गुलिमूले॥ ञं अंगु-
ल्यग्रे॥ टं दक्षोरुमूले॥ ठं जानुनि॥ डं गुल्फे॥ ढं अंगुलि

मूले ॥ यं अंगुल्यग्रे ॥ तं वामोरुमूले ॥ थं जानुनि ॥ दं गु
ल्फे ॥ धं अंगुलिमूले ॥ नं अंगुल्यग्रे ॥ पं दक्षपार्श्वे ॥ फं नमः
वामपार्श्वे ॥ बं पृष्ठे ॥ भं नाभौ ॥ मं जठरे ॥ यं त्वगात्मनेन
मः हृदि ॥ रं असृगात्मने नमः दक्षांसे ॥ लं मांसात्मने न
मः ककुदि ॥ वं मेदात्मने नमः वामांसे ॥ शं अस्थ्यात्मने
नमः हृत्पूर्वदक्षहस्ते ॥ षं मज्जात्मने नमः हृत्पूर्ववामह
स्ते ॥ सं शुक्रात्मने नमः हृत्पूर्वदक्षपादे ॥ हं प्राणात्मने
नमः हृत्पूर्ववामपादे ॥ ळं जीवात्मने नमः हृत्पूर्वजठरे ॥
क्षं परमात्मने नमः आनने ॥ इति बहिर्मातृकान्यासः ॥

ॐ नमः श्रीं नमः ॥ श्री मि ॥ ह्रीं नमः ॥ ॐ नमः श्रीं नमः ॥

मातृकाक्षराणि अनुलोमविलोमानुलोमक्रमेण अस्त्रां
धाला स्वयांगं कृत्वा पंचोपचारै मातृकां मनसाराधयेदिति ॥
बाह्यमातृकान्यासः ॥ अथ मूलमंत्रन्यासः ॥ श्रीआनंदभै
रव ऋषिः ॥ देवीगायत्री छंदः ॥ महात्रिपुरसुंदरी दे
वता ॥ ऐं बीजं ॥ सौः शक्तिः ॥ क्लीं किलकं ॥ मम सर्वाभिल
षितार्थे विनियोगः ॥ ऐं ह्रीं श्रीं देव्यासनायनमः पाद
योः ॥ ३ चक्रासनाय नमः जंघयोः ॥ ३ सर्वमंत्रासना
यनमः जान्वोः ॥ ३ साध्यसिद्धासनायनमः लिंगे ॥ अथ न्या
सः ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीमहात्रिपुरसुंदरी सर्वज्ञतायै

17

ह्रीं श्री० स्वतंत्रतायै व्यापकाभ्यां नमः ।।

अंगुष्ठाभ्यां नमः ।। ह्रीं श्री महात्रिपुरसुंदरी नित्यतृप्तायै तर्जनीभ्यां नमः ।। ह्रीं श्री महा० अनादिबोधायै अनामिकाभ्यां नमः ।। ह्रीं श्री महा० अलुप्तशक्त्यै कनिष्ठिकाभ्यां नमः ।। ह्रीं श्री महा० अनंतशक्त्यै करतलकरपृष्ठाभ्यां नमः ।। इत्यंगुष्ठादिषु न्यस्य मूलेन अष्टधा व्यापकं कुर्यात् ।। ऐं ह्रीं श्रीं ऐं क्लीं सौः श्री महात्रिपुरसुंदरी सर्वज्ञतायै हृदयाय नमः ।। ह्रीं श्री महा० नित्यतृप्तायै शिरसे स्वाहा ।। ह्रीं श्री० स्वतंत्रतायै शिखायै वषट् ।। ह्रीं श्री० अनादिबोधायै कवचाय हुं ।। ह्रीं श्री० अलु

म शक्तये नेत्रत्रयाय वौषट् ॥ ६ श्री अनंतशक्तये अस्त्राय फ
ट् ॥ इति यथास्थानं षडंगानि विन्यस्य ॥ आनंदभैरवाय ऋष
ये नमः शिरसि ॥ देवीगायत्रीछंदसे नमः ॥ मुखे ॥ श्रीमहा
त्रिपुरसुंदरीदेवतायै नमः ॥ हृदये ॥ ऐं बीजाय नमः मुखे ॥ सौः
१८ शक्तये नमः हृदये ॥ क्लीं कीलकाय नमः गुह्ये ॥ इति विन्य ॥
ऐं क्लीं सौः वशानीवाग्देवतायै नमः शिरसि ॥ ३ कामेश्वरीवा
18 ग्देवतायै नमः ललाटे ॥ ३ मोदिनीवाग्देवतायै नमः भ्रूमध्ये ॥ १८
३ विमलावाग्देवतायै नमः कंठे ॥ ३ अरुणावाग्देवतायै नमः
हृदि ॥ ३ जयिनीवाग्देवतायै नमः नाभौ ॥ ३ सर्वेश्वरीवाग्दे
वतायै नमः मूलाधारे ॥ ३ कौलिनीवाग्देवतायै नमः ऊर्वो द

पादांतं ३ मनोमयपाशायनमः हृदि॥ ३ चित्तमयअंकुशा
यनमः कंठे॥ ३ पंचप्राणमय पुष्पबाणेभ्यो नमः शिरसि॥
३ बुद्धिमय चापायनमः नाभौ॥ इतिविन्यस्य ध्यायेत्॥
चतुर्भुजे चंद्रकलावतंसे कुचोन्नते कुंकुमरागशोणे॥
पुंड्रेक्षुपाशांकुशपुष्पबाण हस्ते नमस्ते जगदेकमातः॥
इतिध्यात्वा मानसोपचारैः संपूज्य॥ श्री त्रिपुरसुंद
री देवतायै नमः लंपृथिव्यात्मकं गंधं समर्पयामि नमः॥
श्री॰ हं आकाशा॰ पुष्पं श्री॰ यं वाय॰ धूपं॥ श्री॰ रं तेजा॰ दीपं॥ श्री॰
वं अमृ॰ नैवेद्यं॰ श्री॰ सं सर्वात्मकं सर्वोपचारान्॰ प्रसीद ३

ह स्रोमाल्या मादा[illegible] मं माल्ले महामाय सर्वशक्तिस्वरूपिणी॥ चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥ ततो

यथाशक्ति मूलमंत्रं जप्त्वा पुनः प्राणायाम ऋष्यादि षडं
गध्यान मानस पूजां ले गुह्याति जपं निवेद्य विसर्मेत्॥
ततो बाह्य पूजां आरभेत्॥ पूजा सामग्रीं संपाद्य उभय
तो दीपौ स्थाप्य ततः करशोधनाय मात्रं ध्यात्वा पात्रासादनं १९
कुर्यात्॥ तद्यथा॥ स्वात्मपीठयोर्मध्ये त्रिकोणवृत्तच
तुरस्रात्मकं मंडलं विधाय तत्र मूलेन पुष्पांजलिं दत्वा
वह्निमंडलाय धर्मप्रद दशकलात्मने श्री महात्रिपु
रसुंदर्याः सामान्यार्घपात्राधाराय नमः इति अस्त्रेण
क्षालितं आधारं संस्थाप्य वह्निकला आवाहयेत्॥
जपांते च माल्ले सर्वदे [illegible] कुरु ध्रुवं द्रमे यशो वीर्यं
च सर्वदा॥ शिरसि मालां धृत्वा॥

मं धूम्रायैनमः॥ यं ऊष्मायैनमः॥ रं ज्वलिन्यै० लं ज्वा
लिन्यैनमः॥ वं विस्फुलिंगिन्यै० शं सुश्रियै० षं सुरूपा
यै० सं कपिलायै० हं हव्यवाहायै० क्षं कव्यवाहायै० १०
इत्यभ्यर्च्य तदुपरि अं सूर्यमंडलाय वसुप्रदद्वादश
कलात्मने श्रीमहात्रिपुरसुंदर्याः सामान्यार्घपात्राय
नमः॥ इति पात्रं संस्थाप्य तदुपरि सूर्यकला आवाह
येत्॥ कं भं तपिन्यै नमः॥ खं बं तापिन्यै० गं फं धूम्रायै०
घं पं मरीच्यै० ङं नं ज्वालिन्यै० चं धं रुच्यै० छं दं सुषुम्ना
यै० जं थं भोगदायै० झं तं विश्वायै० ञं णं बोधिन्यै० टं

ढं चार्विण्यै० ठं डं क्षमायै नमः॥१२ इत्यभ्यर्च्य तत्र सोममंडला
यक्षाम प्र दषोडशकलात्मने श्रीमहात्रिपुरसुंदर्याः सा
मान्यार्घपात्रामृतायनमः॥ इति श्रुत्वोदके नापूर्य तत्र चां
द्रीकला आवाहयेत् । अं अमृतायै० आं मानदायै० इं पू
षायै० ईं तुष्ट्यै० उं पुष्ट्यै० ऊं रत्यै० ऋं धृत्यै० ॠं शशिन्यै०
ऌं चंद्रिकायै० ॡं कांत्यै० एं ज्योत्स्नायै० ऐं श्रियै० ओं प्री
त्यै० औं अंगदायै० अं पूर्णायै० अः पूर्णामृतायै० १५ इ
त्यभ्यर्च्य मूलेन अष्टवारमभिमंत्र्य तदुत्तरत एवमेव
शंखं विशेषार्घ्यं च संस्थापयेत्॥ शंखोदकं किंचित्सा
सर्वं सामान्यार्घेनु स्थापनं॥१७

२०

20

२०

मान्याचौदकेन मिश्रयित्वा तेन पूजाद्रव्याणि आस्यु
नं-चार्घ्यपाद्यं तदुत्तरलः पाद्यार्घ्यो-चमनयमधुपर्क
पात्राणि संस्थाप्यावाहयेत्॥ तत्र विशेषार्घ्यकारण
चंदनागर्वा [illegible] दकान्यतमेन क्षीरेणवाप्रूर
णंकार्यं॥ पाद्यादिपात्रेषु क्रद्रव्याणि संयोजयेत्॥ त
थथा॥ श्यामाकदूर्वाकमलविष्णुक्रांताः पाद्यद्रव्या
णि॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वा अ
र्घ्ये द्रव्याणि॥ जातीलवंगकंकोलानि आचमनीयद्र
व्याणि॥ सक्षौद्रंदधि मधुपर्क द्रव्यं॥ उक्तद्रव्याणामभ

ज्ञाने शुक्लं दुर्ल्ले: योग: सर्वत्र ॥ तलोतल योग: ॥ आत्मानं
कामकलारूपं विभाव्यमन्त्रज्ञानं सुषुम्नाध्वनाकुंडलिनी
मुत्थाप्यब्रह्मरंध्रं नीलोत्पलोत्पलं परिप्लाव्य तेनात्मा
नं मातृलं विभाव्य तां चकलां हृतू सरोजे इष्ट देवतारू
पिणीं ध्यात्वा मानसैरभ्यर्च्य पीठपूजामारभेत् ॥

२९   २९

ऐं ह्रीं श्रीं अमलांभोनिधये नमः ॥ ३ रत्नद्वीपाय न
मः ॥ ३ नानावृक्षमहोद्यानाय० ॥ ३ संतानवाटिका
यै० ॥ ३ कल्पवृक्षवाटिकायै० ॥ ३ हरिचंदनवाटिका० ॥
३ मंदारवाटिका० ॥ ३ पारिजातवाटिका० ॥ ३ कदंबवाटि० ॥

२१

३ बिल्ववाटिका०॥३ पुष्परागरत्नप्राकाराय०॥३ वप्वरा
गरत्नप्राकारायन०३ गोमेदरत्नप्राकाराय०॥३ वज्रे
रत्नप्राकाराय०॥३ वैडूर्यरत्नप्राकाराय०॥३ इंद्रनी
लरत्नप्राकाराय०॥३ मुक्ताफलरत्नप्राकाराय०॥३
मरकतरत्नप्राकाराय०॥३ विद्रुमरत्नप्राकाराय०॥
३ माणिक्यमंडपाय०॥३ सहस्त्रस्तंभमंडपाय०॥
३ अमृतवापिकायै०॥३ आनंदवापिकायै०॥३ बाल्हत
पोजाराय०॥३ चंद्रिकोजाराय०॥३ महाशृंघारपरि
घायै०॥३ चिंतामणिगृहराजाय०॥३ पूर्वाम्नायपूर्वे

द्वाराय०॥३दक्षिणाम्नायदक्षिणद्वाराय०॥३पश्चिमा
म्नायपश्चिमद्वाराय०॥३उत्तराम्नायउत्तरद्वाराय०॥
३महामणिमयवेदिकायै०॥३रत्नप्रदीपवल्लयाय०॥ २२
३महासिंहासनाय०॥३ब्रह्ममयैकमंचकपादाय०॥
३विष्णुमयैकमंचकपादाय०॥३रुद्रमयैकमंचकपादा०॥
२२ ३ईश्वरमयैकमंचकपादाय०॥३सदाशिवमयैफलकं [illegible]०॥
22 ३हंसतूलिकायै०॥३हंसतूलमहोपधानाय०॥३कौसुं
भास्तरणाय नमः०॥इतिपीठं संपूज्य॥३मध्येविमर्से
नमः॥३सर्वैर्दानीत्यै०॥[illegible]कांस्यै०॥३दक्षिणे हस्से॥

३ नैरृत्ये कीलैं॰ ३ पश्चिमे सन्त्रैं॰ ३ वायव्ये व्रूँ॰
३ ५ सौरउ ह्रुँ॰ ३ ईशाने ऊँ॰ एताः नव शक्तयो
ऽदिक्षु मध्ये च संपूज्य ॥ ३ पुनर्मध्ये श्रीमहात्रिपुर
सुंदर्यासनाय ॥ इति मन्त्रपूर्वकं आसनं संपूज्य हृद
यारविंदस्थित नानारत्नखचित सुवर्णमंडपे श्रीच
क्रांकित मरणालामर सपद्मरूपं योगपीठं कल्प
यित्वा गंधाद्यैः पीठमभ्यर्च्य ॥ तदुपरि च ऊँ प्रतिमां
वा प्रतिष्ठाप्य तत्र देवीमावाहयेत् ॥ तद्यथा ॥ ऐं त्रिपुरे
देवि विद्महे क्लीं कामेश्वरी धीमहि ॥ सौः तन्नः रा

...नंदनाथ० ... मशानंदनाथ० ६ आनंदानंद० ज्ञानानंद० ...
...दा। पूर्णानंदनाथ० १० स्वभावानंद० ११ प्रतिभानंद० १२ सुभगानंद० १३
क्तिः प्रचोदयात्॥ महापद्मवनांतस्थे कारणानंदविग्र
हे॥ सर्वभूतहिते मातः एह्येहि परमेश्वरि॥ देवेशि भ
क्तिसु... ...परिवारसमन्विते॥ यावत्त्वां पूजयिष्या
मि तावत्त्वं सुस्थिरा भव॥ इति मंत्राभ्यां मूलेनावा
ह्य ... ...षोडशोपचारैः संपूज्य मूलेन त्रिः सं
तर्प्य। आवरणार्चनं कुर्यात्॥ ऐं ह्रीं श्रीं श्रीमहात्रिपु
रसुंदरी सर्वज्ञतायै हृदयदेव्यंबा श्रीपादुकां पूजयामि नमः तर्पयामि स्वाहा॥ एवं सर्वत्र ज्ञेयं। इति

२३

प्रबोधानंदनाथ श्रीगुरुपादुकां पूजयामि नमः तर्पयामि स्वाहा॥ अग्रनाथा
नंदनाथ श्रीपरमपादुकां॥ ...नंदनाथ श्रीपरमेष्ठीगुरु०॥ देवानंदनाथ श्री
परात्परगुरुपादुकां०॥ ४

मंत्रेण दक्षिण हस्तेन अक्षत पुष्पा वामे वक्ष अर्पयेत्॥ वा
म हस्ते मुद्रितं त दर्शावे आर्द्रिक खंडेन पुष्पादि नाक युग
पत्र अर्पयेत्॥ विशेषार्घ्ये केवल अर्पयेत्॥ ३ श्रीमहा त्रिपुर
सुंदरी निस्पत्लनाये शिरो देव्यं बा श्री०॥ ३ श्रीमहा०
अनादि बोधाये शिरवा देव्यं बा श्री०॥ ३ श्री० स्वतंत्र
ताये कवच देव्यं बा श्री०॥ ३ श्री० अलुप्त शक्तये नेत्र
देव्यं बा श्री०॥ ३ श्री० अनंत शक्तये अस्त्र देव्यं बा श्री०॥
इति अग्नी शान असुर वायु कोणेषु मध्ये च अभ्यर्च्य इति
त्रिकोणा ग्रांत रे अग्नि कोणे दक्षिणा ग्रे देवायां॥ ३ ऐं कार

मैश्वर्यंबाश्री०॥३भगमालिन्यंबाश्री०॥३नित्यक्लिन्नांबा
श्री०॥३भेरुंडाबाश्री०॥३वह्निवासिन्यंबाश्री०॥उत्त
रे रेखायां॥३महाविद्येश्वर्यंबाश्री०॥३शिवदूत्यंबाश्री०॥

२४

३त्वरितांबाश्री०॥३कुलसुंदर्यंबाश्री०॥३नित्यांबाश्री०॥
पूर्व रेखायां॥३नीलपताकिन्यंबाश्री०॥३विजयांबाश्री०॥
३सर्वमंगलांबाश्री०॥३ज्वालामालिन्यंबा०॥३चित्रांबा०॥

२५

अत्रैताः पूज्या बिंदावेव॥३मित्रीशमय्यंबा०॥३षष्ठी
शमय्यंबा०॥३उड्डीशमय्यंबा०॥३चर्यानाथमय्यंबा०॥
३लोपामुद्रामय्यंबा०॥३अगस्त्यंबा०॥इति दिव्यौघः॥

२४

३ कालतापनमर्प्यंबा०॥३धर्माचार्यमर्प्यंबा०॥३मुक्तके
शीश्वरमर्प्यंबा०॥३दीपकलानाथमर्प्यंबा०॥३विष्णुदेवम
र्प्यंबा०॥३प्रभाकरदेवमर्प्यंबा०॥३इति सिद्धौघः॥३ ले
ओदेवमर्प्यंबा०॥३ मनोजदेवमर्प्यं०॥३ कल्याणदेवमर्प्यं०॥
रत्नदेवमर्प्यं०॥३वासुदेवमर्प्यं०॥३रामानंदमर्प्यं०॥
इतिमानवौघः॥ देवतारस्मिन्नेवचिंतनीया॥ ततः
प्रथमचतुरस्रे प्रागादिदशादिक्षु॥३ अणिमासिध्यं
बा०॥३ लघिमासिध्यंबा०॥३महिमासिध्यंबा०॥३
ईशित्वसिध्यंबा०॥३वशित्वसिध्यंबा०॥३प्राकाम्यसिध्यं०॥

३भुक्तिसि०।।३ इच्छासि०।।३प्राप्तिसि०।।३सर्वकामसि०।।
(पुनाद्लीय-चलुरस्रे।।३ब्राह्म्यंबा०।।३माहेश्वर्यंबा०।।
३कौमार्यंबा०।।३वैष्णव्यंबा०।।३वाराह्यं०।।३इंद्राण्यंबा
३चामुंडांबा०।।३महालक्ष्म्यंबा०।।३सर्वदिक्षु।।पुनःरस्र
लोचे।।३सर्वसंक्षोभिणीमुद्रा राज्ञ्यंबा०।।३सर्वविद्रावि
णीमुद्रा [illegible] राज्ञ्यंबा०।।३सर्वाकर्षिणीमुद्रा०।।३सर्ववशं
शंकरीमुद्रा०।।३सर्वोन्मादिनीमुद्रा०।।३सर्वमहांकुश
मुद्रा०।।३सर्वखेचरीमुद्रा०।।३सर्वबीजमुद्रा०।।३सर्व
योनिमुद्रा०।।३सर्वत्रिखंडिनीमुद्रा०।।३सर्वदिक्षुयन

२५

२५

25

त्स्व्यसंप्रज्य ॥३ त्रैलोक्यमोहनचक्रस्वामिनीत्रिपुरा
बाश्री० ॥३ गकूट योगिन्यंबा० ॥ इतितत्तदावरणेच
क्रेश्वरीपुरतः समर्चयेत् ॥ इति प्रथमावरणं ॥ अ
भीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्यासम
र्पयेतुभ्यं प्रथमावरणार्चनं ॥१॥ इति मंत्रेणामृतं
तेबिंदौ पुष्पांजलिं प्रक्षिप्य ॥ षोडशदले ॥३ कामा
कर्षिण्यंबा० ३ बुध्याकर्षिण्यंबा० ॥३ अहंकाराकर्षि
ण्यंबा० ॥३ शब्दाकर्षिण्यंबा० ॥३ स्पर्शाकर्षिण्यंबा० ॥
३ रूपाकर्षिण्यंबा० ॥३ रसाकर्षिण्यंबा० ॥ गंधाकर्षिण्यंबा०
॥

३ च्चनाकर्षिण्यंबा०॥३धैर्याकर्षिण्यंबा०॥३स्मृत्या
कर्षिण्यंबा०॥३नामाकर्षिण्यंबा०॥३बीजाकर्षिण्यं
बा०॥आत्माकर्षिण्यंबा०॥३अमृताकर्षिण्यंबा०॥
३शरीराकर्षिण्यंबा०॥३सर्वाशापरिपूरकचक्र
स्वामिनित्रिपुरेश्वर्यंबा०॥३गुप्तयोगिन्यंबा०॥अ
भीष्टसिद्धिं० द्वितीयावरणार्चनं॥२॥ततोष्टदले॥

२६ 26

३अनंगकुसुमांबाश्री०॥३अनंगमेखलांबा०॥
३अनंगमदनांबा०॥३अनंगमदनातुरांबा०॥३
अनंगरेखांबा०॥३अनंगवेगिन्यंबा०॥३अनंगा

कुशांबा० ॥ ३ ॥ अनंगमालिन्यंबा० ॥ ३ ॥ सर्वसंक्षोभि-
णीचक्रस्वामिनीत्रिपुरसुंदर्यंबाश्री० ॥ ३ ॥ गुप्ततर-
योगिन्यंबा० ॥ अभीष्टं० तृतीयावरणार्चनं ॥ ३ ॥
चतुर्दशारमागादि ॥ ३ ॥ सर्वसंक्षोभिण्यं० ॥ ३ ॥ सर्व
विद्राविण्यं० ॥ ३ ॥ सर्वाकर्षिण्यं० ॥ ३ ॥ सर्वाह्लादिन्यं
बा० ॥ ३ ॥ सर्वमोहिन्यंबा० ॥ ३ ॥ सर्वस्तंभिन्यंबा० ॥ ३ ॥
सर्वजृंभिण्यं० ॥ ३ ॥ सर्ववशंकर्यंबा० ॥ ३ ॥ सर्वरंजि
न्यंबा० ॥ ३ ॥ सर्वोन्मादिन्यंबा० ॥ ३ ॥ सर्वार्थसाधकांबा० ॥
३ सर्वसंपत्तिपूरकांबा० ॥ ३ ॥ सर्वमंत्रमय्यंबा० ॥ ३ ॥ स

वैंद्वं द्वक्षयंकर्यंबा०॥३सर्वसौभसाग्यदायकचक्रस्वामि
नीत्रिपुरवासिन्यंबा०॥३संप्रदाययोगिन्यंबा०॥अभी
ष्टं० चतुर्थावरणार्चनं॥ बहिर्दशारे॥सर्वसिद्धिप्र

दांबा०॥३सर्वसंपत्प्रदांबा०॥३ सर्वदुःखविमोचन्यं॥

२७

३सर्वमृत्युप्रशमन्यं०॥३ सर्वविघ्ननिवारिण्यंबा०॥
३सर्वांगसुंदर्यंबा०॥३सर्वसौभाग्यदायिन्यंबा०॥

२७

२७

३सर्वार्थसाधकचक्रस्वामिनीत्रिपुराम्बा०॥३कुलो
त्तीर्णयोगिन्यंबा०॥अभीष्टं० पंचमावरणार्चनं॥५॥

अंतर्दशारे ॥३ सर्वज्ञांबा० ॥३ सर्वशक्त्यंबा० ॥३ सर्वैश्व
र्यंबा० ॥३ सर्वज्ञानमय्यंबा० ॥३ सर्वव्याधिविनाशिन्यंबा० ॥
३ सर्वाधारस्वरूपिण्यंबा० ॥३ सर्वपापहरांबा० ॥३ स
र्वानंदमय्यंबा० ॥३ सर्वरक्षास्वरूपिण्यंबा० ॥३ सर्वे
प्सितफलप्रदांबा० ॥३ सर्वरक्षाकरचक्रस्वामिनी त्रि
पुरमालिन्यंबा० ॥३ निगर्भयोगिन्यंबा० ॥ अभीष्ट० ॥ ष
ष्ठावरणार्चनं ॥६॥ अष्टकोणे ॥३ वशिन्यंबा० ॥३ का
मेश्वर्यंबा० ॥३ मोदिन्यंबा० ॥३ विमलांबा० ॥३ अरुणां

बी०॥२ अचिन्त्यंबा०॥२ सर्वैश्वर्यंबा०॥२ कौलिन्यंबा०॥ सर्वरोगहरचक्रस्वामिनित्रिपुरांबा०॥२ रहस्ययोगिन्यंबा०॥ अं श्री ह्०॥ सप्तमावरणार्चनं॥७॥ अष्टकोणे चतुर्दिक्षु॥२ बाणिन्यंबा०॥२ चापिन्यंबा०॥२ पाशिन्यंबा०॥२ अंकुशिन्यंबा०॥ इति सप्त मांलर्गतमेव॥ त्रिकोणाग्रदक्षवामकोणे पु॥२ कामेश्वर्यंबा०॥२ वज्रेश्वर्यंबा०॥२ भगमालिन्यंबा०॥२ सर्वसिद्धिप्रदचक्रस्वामिनित्रिपुरांबा०॥२ रहस्ययोगिन्यंबा०॥ अं श्री ह्०॥ अष्टमाव

२८

२८

28

वरणार्चनं ॥८॥ बिंदौ मस्त्वे नार्चयेत् ॥३ सर्वानंदमय
चक्रस्वामिनी चक्रेन गत साम्राज्यत्वे दमी त्रिपुरांबा ॥
३ परापर रहस्य योगिन्यंबा ॥ ॐ श्री प्रि० नवमावरणा
र्चनं ॥ पुनः षोडशोपचारैः संपूज्य ॥ अग्निं वैश्वदेव
वत् प्रतिष्ठाप्य परिसमुह्य परिषिच्य ॥ तस्मिन् स्वेष्ट
देवतां ध्यात्वा ॥ अष्टोत्तरशत मष्टाविंशति द्वादशाहुतीर
त्रेन आज्येन वा हुत्वा पुनः परिषिच्य ॥ विभूतिं धृत्वा
विसृज्य ॥ ततो चक्रस्य ईशान आग्नेय नैरृत्य वा
युकोणेषु प्रत्येकं त्रिकोणाकार चतुरस्रात्मिका निर्मंड

श्री निकलावटुकाय योगिनी क्षेत्रपाल गणपतिं संपू
ज्य बलिदानं कुर्यात्॥ ईशानमंडले बटुभैरवाय नमः॥
इति गंधादिभिः संपूज्य॥ एह्येहि देवीपुत्र बटुकनाथ
कपिलजटाभार भासुर त्रिनेत्र ज्वालामुख सर्ववि
घ्नान्नाशय २ सर्वोपचार सहितं बलिं गृह्ण २ स्वाहा॥
इति मंत्रेण वामांगुष्ठानामिकाभ्यां सोदकं बलिं मुद्रस
ज्येत्॥ एवं आग्नेयमंडले यां योगिनीभ्यो नमः इति मंड
लं संपूज्य यां योगिनीभ्यः स्वाहा सर्ववर्णयोगिनीकुंभ

२९

२९

29

फट् स्वाहा॥ इति मंत्रेण वामांगुष्ठानामिकामध्यमाभिः
अर्द्धजलधारया बलिमुत्सृजेत्॥ ततः नैर्ऋत्यकोणे
क्षां क्षेत्रपालाय नमः॥ इति क्षेत्रपं मंडले संपूज्य क्षां
क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहि
तं बलिं गृह्ण गृह्ण स्वाहा॥ इति वामांगुष्ठतर्जनीभ्यां त
र्जन्यैकया वा बलिमुत्सृजेत्॥ ततो वायव्ये गं गणपत
ये नमः इति गणपं संपूज्य गां गीं गूं गैं गौं गः गण
पतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण

स्वाहा ॥ इति वामागुष्ठमध्यमाभ्यां बलिमुत्सृजेत् ॥ इत्थं
बलिदानं विधाय प्रधानदेवतायै मल्लेनपुरतो बलिं द
द्यात् ॥ आरात्रिकं कृत्वा मालामंत्रेण मंत्रपुष्पांजलिं
दत्वा प्रणम्य ॥ ततः शक्तिमाहूय वाञ्छायौवना प्रौढा वा

३० आवाहनपूर्वकं यथाविभवं संपूज्य तस्य हस्ते पानं

३० दत्वा अनेन मंत्रेण ॥ अलिपात्रमिदं तुभ्यं दीयते २०
पितृतान्वितं ॥ स्वीकुरु सुभगे देवी जयं देहि सर्व
देहे ॥ स्वीकुरुत तच्छेषं किंचित् गृहीत्वा सामयिकान्
शक्तिवाक्यं ॥ वत्स तुभ्यं प्रदास्यामि पीतशेषं कुलान्तते ॥ तच्छेषेन
संहरिष्यामि तव भीष्टं ददाम्यहं ॥ ११२

अभ्यर्च्य सर्वैर्ध्यैः पात्रं दत्वा तैः सर्वैः गुरुतर्पणं प्र
र्वकं तत्त्वं च तुष्टयं स्वीकृत्य स्वरूपाचिंतनं कुर्या
त्॥ इतः परं प्राणायाम बुद्धि देह धर्माधिकार
तः॥ ओं जाग्रत्स्वप्नसुषुप्ति मनसा वाचा हस्ताभ्यां प
द्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं गु
रुदेवे समर्पितमस्तु॥ प्रबोधानंद नाथ श्री गुरु पा
दुकां पूजयामि नमस्तर्पयामि स्वाहा॥ जगन्नाथानं
द नाथ श्री परम गुरु पादुकां०॥ अनंतानंद नाथ श्री

परमेष्ठीगुरुपादुकां ॥ देवानंदनाथश्रीपरापरगु
रुपादुकां ॥ शान्तगुरुपरंपरातर्पणं कृत्वा मूलेन हृद
येत्रिः संतर्प्य ॥ प्ररूपस्य अहं ० १ ॥ मायाकला ० ॥२॥
शिवशक्ति ० ॥३॥ प्ररूपस्य ० मायाकला ० शिवाशक्ति ॥
यावत्सूर्यो वर्नौ सो [illegible] भिवलिलावत् पात्रं [illegible] यान्ते ॥ प
र्णपात्रं [illegible] हृणां लौंशीं [illegible] पठेत् ॥ जयंतु देव्यो ह
रपादपंकजं प्रसन्नचामामृतमोक्षदायकं ॥ अनं
तसिद्धांतमिलप्रबोधकं नमामि चाष्टकयोगिनी
सामान्यार्घ्ये देव्यक परि [illegible] सर्वमयि [illegible] नमो स्य ॥
बालमुखाय ए [illegible] पादुकं [illegible]

गणान्नः॥१॥ योगिनीचक्रमध्यस्थं मातृमंडलवे
ष्टितं॥ नमामि शिरसा नाथं भैरवं भैरवीप्रियं॥२॥
अनादिघोरसंसारव्याधिध्वंसैकहेतवे॥ नमः श्री
नाथवैद्याय कुलौषधविधायिने॥३॥ आपदादु
रितं रोगा समया चारलंघनात्॥ ये सर्वे तेव्यपोहंतु
द्रव्यचक्रस्य मेलनात्॥४॥ आयुरारोग्यमैश्वर्यं कीर्त्ति
र्लक्ष्मीसुखं जयं॥ कांतिर्मनोरथश्चास्तु पातु सर्वोश्च
देवताः॥५॥ संहृजकानां प्रतिपालकानां यतींद्रयोगी

कृतपोधनानां॥ देशस्य शब्दस्य कुलस्य राज्ञः करो

कुत्रांलिं भगवान् कुलेश॥६॥ नंदंतु साधकः कुली

न्वेयदर्शीकायस्तत्र्याख्यानारव्या॥ चतुरेकमहान्वेयाय॥

नंदंतु सर्वकुलकोल्तरताः पराय अन्ये विशेषपद

भेदकरांभवाय॥७॥ नंदंतु सिद्धगुरवस्तदनुक्रमा

चान्ये च नुगाः समयिनो वटुकाः कुमार्याः॥ षट्योगि

नी भैरवरीर कुलभैरवना नंदंतु भूमिपतिगोद्विज

साधुलोकाः॥८॥ नंदंतु नीतिनिपुणा निरघघानि

32

32

ष्टा निर्मत्सरा निरूपमा निरूपद्रवाश्च। निर्ध्याना निरंज
नरता गुरवो निरीहः शांताश्च शांतमनसो हतशो
कशंका॥८॥ नंदंतु योगनिरताः कुलयोगयुक्ताश्चा
र्यसामयिकसाधकपुत्रकाश्च। गावो द्विजा युवतयो य
तयः कुमार्यो धर्मो भवंतु निरताः गुरुभक्तियुक्ताः॥१०॥
देहस्था खिलदेवता गजमुखाः क्षेत्राधिपा भैरवा
योगिन्यो बटुकश्च यक्षपितरो भूताः पिशाचा ग्रहाः॥
अन्ये दिक्चरखेचरीश्च कुचरा वेतालिकाः खेट

कास्त्वपास्य: कृत्वपुनरस्य पिबत: पानं सदीपं चरूं ॥११॥

त्वं पातु मातर: सर्वा: समुद्राश्च विनायका: ॥ योगिन्य:

क्षेत्रपालाश्च ममादेहे व्यवस्थिता: ॥१२॥ शिवाद्या

वनिपर्यंतं ब्रह्मादि स्तंबसंयुतं ॥ कालज्ञादि शिवांतंच

जगयज्ञेन त्वं पातु ॥१३॥ इति रां लिस्तवं ॐ संपूर्णं ॥

॥अथ वचनानि ॥ अ संस्कृतं द्रथापानं संस्कृतं चैव

वं: स्वयं ॥ चक्रकृजा विघो रास्तं सर्वसिद्धिकरं सु

धं ॥ असंस्कृतं परो: पानं कृत्वहो देगकारणं ॥

33

श्चानिर्मत्सरानिरूपमानिरूपद्रवाश्च॥ निरस्यानिरंजनरतागुरवोनिरीह्यः शांताश्च शांतमनसोहलश्शेकरांका॥९॥ नंदंतुयोगनिरताः कुलयोगपुकाराचार्यसामयिकसाधकपुत्रकाश्च॥ गावोद्विजायुवतयोयतयः कुमार्यैधर्मौभवंतुनिरताः गुरुभक्तियुक्ताः॥१०॥ देहस्थाखिलदेवतागजमुखाक्षेत्राधिपाभैरवायोगिन्योवटुकश्चयक्षपितरोभूताः पिशाचाग्रहाः॥ अन्येदिकचरखेचरीश्चकुचरावेतालिकाः खेट

संस्कृतं सिद्धिजनकं प्रायश्चित्तादिशोधनं॥ २॥
मंत्राणां स्फुरणं तेन महापातकनाशनं॥ आ
युः श्रीकांतिसौभाग्यं ज्ञानं संस्कृतपानतः॥ अ
ऐश्वर्यं खेचरत्वं पतनं विधिवर्जनं॥ संमतार्थ
वचनानि॥ संग्रहे॥ हालां पिबेद्दीक्षितमंदिरेषु
सुप्तो निशायां गणिकागृहेषु॥ विराजते चर्वणमेव कुर्या
द्धि राजते कौलिकचक्रवर्त्ती॥ १॥ पंडितदीनानाथ
जिरधरलालस्य पुस्तकमिदं॥ पत्रालि चतुस्त्रिंशत्

36

38

॥पं। गोविन्दजी नागर संचाली

देवीपूजा

देवी पूजा पद्धतिः

३८